shrIviShNustotraM brahmoktaM narasiMhapurANe 1

# શ્રીવિષ્ણુસ્તોત્રમ્ ૨

## Document Information

Text title : viShNustotrabrahmokta from narasimhapurANa

File name : viShNustotrabrahmoktanarasimhapurANa.itx

Category : vishhnu, stotra, vishnu

Location : doc_vishhnu

Proofread by : Singanallur Ganesan singanallur at gmail.com

Translated by : https://archive.org/details/NarsimhaPuranGitapress

Description-comments : Narasimhapurana adhyAya 53

Latest update : June 6, 2013

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 17, 2023

*sanskritdocuments.org*

# શ્રીવિષ્ણુસ્તોત્રમ્ ૨

રાજોવાચ –
વાક્પુષ્પેણ કથં બ્રહ્મન્ બ્રહ્માપ્યર્ચિતવાન્ હરિમ્ ।
તન્મે કથય વિપ્રેન્દ્ર બ્રહ્મોક્તં સ્તોત્રમુત્તમમ્ ॥

માર્કણ્ડેય ઉવાચ –
શૃ‌ણુ રાજન્ પ્રવક્ષ્યામિ સ્તોત્રં બ્રહ્મમુખેરિતમ્ ।
સર્વપાપહરં પુણ્યં વિષ્ણુતુષ્ટિકરં પરમ્ ॥

તમારાધ્ય જગન્નાથમૂર્ધ્વબાહુઃ પિતામહઃ ।
ભૂત્વૈકાગ્રમના રાજન્નિદં સ્તોત્રમુદીરયત્ ॥

બ્રહ્મોવાચ –
નમામિ દેવં નરનાથમચ્યુતં નારાયણં લોકગુરું સનાતનમ્ ।
અનાદિમવ્યક્તમચિન્ત્યમવ્યયં વેદાન્તવેદ્યં પુરુષોત્તમં હરિમ્ ॥ ૧॥

આનન્દરૂપં પરમં પરાત્પરં ચિદાત્મકં જ્ઞાનવતાં પરાં ગતિમ્ ।
સર્વાત્મકં સર્વગતૈકરૂપં ધ્યેયસ્વરૂપં પ્રણમામિ માધવમ્ ॥ ૨॥

ભક્તપ્રિયં કાન્તમતીવ નિર્મલં સુરાધિપં સૂરિજનૈરભિષ્ટુતમ્ ।
ચતુર્ભુજં નીરજવર્ણમીશ્વરં રથાઙ્ગપાણિં પ્રણતોઽસ્મિ કેશવમ્ ॥ ૩॥

ગદાસિશઙ્ખાબ્જકરં શ્રિયઃ પતિં સદાશિવં શાર્ઙ્ગધરં રવિપ્રભમ્ ।
પીતામ્બરં હારવિરાજિતોદરં નમામિ વિષ્ણું સતતં કિરીટિનમ્ ॥ ૪॥

ગણ્ડસ્થલાસક્તસુરક્તકુણ્ડલં સુદીપિતાશેષદિશં નિજત્વિષા ।
ગન્ધર્વસિદ્ધૈરુપગીતમૃગ્ધ્વનિં જનાર્દનં ભૂતપતિં નમામિ તમ્ ॥ ૫॥

હત્વાસુરાન્ પાતિ યુગે યુગે સુરાન્ સ્વધર્મસંસ્થાન્ ભુવિ સંસ્થિતો હરિઃ ।
કરોતિ સૃષ્ટિં જગતઃ ક્ષયં યસ્તં વાસુદેવં પ્રણતોઽસ્મિ કેશવમ્ ॥ ૬॥

યો મત્સ્યરૂપેણ રસાતલસ્થિતાન્ વેદાન્ સમાહૃત્ય મમ પ્રદત્તવાન્ ।

નિહત્ય યુદ્ધે મધુકૈટભાવુભૌ તં વેદવેદ્યં પ્રણતોઽસ્મ્યહં સદા ॥ ૭॥

દેવાસુરૈઃ ક્ષીરસમુદ્રમધ્યતો ન્યસ્તો ગિરિર્યેન ધૃતઃ પુરા મહાન્ ।
હિતાય કૌર્મં વપુરાસ્થિતો યસ્તં વિષ્ણુમાદ્યં પ્રણતોઽસ્મિ ભાસ્કરમ્ ॥ ૮॥

હત્વા હિરણ્યાક્ષમતીવ દર્પિતં વરાહરૂપી ભગવાન્ સનાતનઃ ।
યો ભૂમિમેતાં સકલાં સમુદ્ધરંસ્તં વેદમૂર્તિં પ્રણમામિ સૂકરમ્ ॥ ૯॥

કૃત્વા નૃસિંહં વપુરાત્મનઃ પરં હિતાય લોકસ્ય સનાતનો હરિઃ
જઘાન યસ્તીક્ષ્ણનખૈર્દિતેઃ સુતં તં નારસિંહં પુરુષં નમામિ ॥ ૧૦॥

યો વામનોઽસૌ ભગવાઞ્જનાર્દનો બલિં બબન્ધ ત્રિભિરૂર્જિતૈઃ પદૈઃ ।
જગત્રયં ક્રમ્ય દદૌ પુરંદરે તદેવમાદ્યં પ્રણતોઽસ્મિ વામનમ્ ॥ ૧૧॥

યઃ કાર્તવીર્યં નિજઘાન રોષાત્ ત્રિસ્સપ્તકૃત્વઃ ક્ષિતિપાત્મજાનપિ ।
તં જામદગ્ન્યં ક્ષિતિભારનાશકં નતોઽસ્મિ વિષ્ણું પુરુષોત્તમં સદા ॥ ૧૨॥

સેતું મહાન્તં જલધૌ બબન્ધ યઃ સમ્પ્રાપ્ય લઙ્કાં સગણં દશાનનમ્ ।
જઘાન ભૃત્યૈ જગતાં સનાતનં તં રામદેવં સતતં નતોઽસ્મિ ॥ ૧૩॥

યથા તુ વારાહનૃસિંહરૂપૈઃ કૃતં ત્વયા દેવ હિતં સુરાણામ્ ।
તથાદ્ય ભૂમેઃ કુરુ ભારહાનિં પ્રસીદ વિષ્ણો ભગવન્નમસ્તે ॥ ૧૪॥

ઇતિ બ્રહ્મોક્તં વિષ્ણુસ્તોત્રમ્ ।

શ્રીમાર્કણ્ડેય ઉવાચ –
ઇતિ સ્તુતો જગન્નાથઃ શ્રીધરઃ પદ્મયોનિના ।
આવિર્બભૂવ ભગવાઞ્શઙ્ખચક્રગદાધરઃ ॥

ઉવાચ ચ હૃષીકેશઃ પદ્મયોનિં સુરાનપિ ।
સ્તુત્યાનયાહં સંતુષ્ટઃ પિતામહ દિવૌકસઃ ॥

પઠતાં પાપનાશાય નૃણાં ભક્તિમતામપિ ।
યતોઽસ્મિ પ્રકટીભૂતો દુર્લભોઽપિ હરિઃ સુરાઃ ॥

સઙ્ક્ષિપ્તં અધ્યાયે શ્લોક સંખ્યા ૬૮
શ્રીનરસિંહપુરાણે કૃષ્ણાપ્રાદુર્ભાવો નામ ત્રિપઞ્ચાશોઽધ્યાયઃ ॥ ૫૩॥

From Narasimhapurana adhyAya 53 Selected verses.
https://archive.org/details/NarsimhaPuranGitapress

Proofread by Singanallur Ganesan singanallur at gmail.com

*shrIviShNustotraM brahmoktaM narasiMhapurANe 1*

pdf was typeset on September 17, 2023

Please send corrections to *sanskrit@cheerful.com*